## संस्कृतमहोत्सवः

संकृतभाषा विश्वस्य प्राचीनतमा भाषास्ति तथा च अधुनापि प्रचलितास्ति | प्रायः सर्वेषां प्राचीनशास्त्राणां मूलभाषा संस्कृतमेव अस्ति तत्र आयुर्वेदस्यापि समावेशः भवति | आयुर्वेदे स्नातकपदवी कृते संस्कृतस्य ज्ञानमावश्यकमस्ति | साम्प्रतकाले संस्कृतस्य न्यूनोपयोगेन विश्वस्मिन् संस्कृतज्ञापकाः बह्वल्पकाः सन्ति | संस्कृतभाषायाः अल्पोपयोगः समाजाय लोकाय च हानीप्रदं वर्तते | कारणं यत् संस्कृतभाषायाः लुप्तत्वे सति प्राचीनसंस्काराः प्राचीनपरंपरा च विलुप्ता भविष्यन्ति, तथा च उक्तं कारणद्वयं भारतस्य चायुर्वेदस्य अभिन्नाङ्गरूपेण विराजमानं वर्तते |

तदेव भावनायाः विचारं कृत्वा प्रतिवर्षं संस्कृतसंस्कृतिसंस्काररक्षणाय कृतनिश्चयाः "स्वामिनारायण विश्वविद्यालयस्य" अध्यक्षाः शास्त्रीस्वामिश्रीप्रेमस्वरुपदासजी, उपध्यक्षौ श्रीस्वामिभक्तवत्सलदासजी तथा च श्रीस्वामिभक्तिनंदनदासजी चरणानां प्रेरणया तथा च विश्वविद्यालयस्य कुलपतिः वैद्यश्रीधरः राव, कुलसचिव डो. श्रीअजित गंगावणे महोदयानां पूर्णसहयोगेन "सर्वेषां कृते संस्कृतं" इति विषयं अवलंब्य संस्कृतसप्ताहस्य आयोजनं भवेदिति | किन्तु "संस्कृतसप्ताहे" विश्वविद्यालयस्य सर्वे छात्राः शिक्षकाः च सहर्षं भागं गृहीतवन्तः |

### संस्कृतमहोत्सवान्तर्गतकृतं कार्यक्रमम्

विश्वविद्यालयस्य आदेशानुसारं तथा च विद्यालयस्य प्रधानाचार्यैः यथा निर्दिष्टं तद्वत् अस्मत् विभागेन आयोजितस्य कार्यक्रमस्य विवरणम् |

### प्रथमदिवसः - उद्घाटनसमारोहः / नाटकस्पर्धा

संस्कृतमहोत्सवस्य प्रथमदिवसे संस्कृतमहोत्सवकार्यक्रमस्य यथा सूचना प्रदत्ता तथा सर्वमहाविद्यालयस्य सर्ववर्षीयछात्रान् सर्वशिक्षकगणान् एकीकृत्य विद्यालस्य प्रधानाचार्यस्य समुपस्थितौ "संस्कृतसप्ताहसमारोहस्य" उद्घाटनमभवत् | एवञ्च सर्वमहाविद्यालयस्य सर्ववर्षीयछात्रान् सर्वशिक्षकगणान् एकीकृत्य "श्रीमहाभारते

स्त्रीचरित्रम्" एवं श्रीरामशबरीमिलनम् इति विषये नाटकस्पर्धायाः आयोजनं कृतमासीत् | तत्र उभयोः प्रतिस्पर्धाथिनः प्रथमं क्रमाङ्कं प्राप्तवन्तः।

## द्वितीयदिवसः – श्लोककण्ठपाठस्पर्धा

संस्कृतमहोत्सवस्य द्वितीयदिवसे श्लोककण्ठपाठस्पर्धायाः आयोजनं कृतं आसीत् | तत्र चक्रद्वयं आसीत् तत्र प्रथम चक्रे ये छात्राः श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययस्य कण्ठस्थीकरणं आवश्यकं वर्तते । ते एव छात्राः द्वितीये चक्रे प्रवेशप्राप्तुं शक्यते । श्लोककण्ठपाठस्पर्धा (द्वितीयं चरणं) अग्रे श्लोककण्ठपाठस्पर्धायाः द्वितीयचरणस्य आयोजनमभवत् | तत्र ये छात्राः श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययः कण्ठस्थं अवदन्, ते छात्राः द्वितीये चक्रे प्रवेशं संप्राप्य तेषां स्पर्धा अभवत्। द्वितीये चक्रे छात्राः आयुर्वेदस्य, मन्त्राणां एवं श्रीमद्भगवत्गीतायाः १४ चतुर्थदशाध्ययं विहाय यं कं अपि श्लोकं वक्तुं शक्यते। तत्र आयुर्वेद महाविद्यालयस्य तृतीय वर्षे पठती छात्रा "वैदेही केतनभाई पटेल" प्रथमं क्रमाङ्कं प्राप्तवती।

## तृतीयदिवसः – समापनकार्यक्रमः

संस्कृतमहोत्सवस्य तृतीयदिवसे "संस्कृतमहोत्सव समापनकर्याक्रमं" आयोजितं आसीत् | "स्वामिनारायण विश्वविद्यालयस्य" अध्यक्षाः शास्त्रीस्वामिश्रीप्रेमस्वरुपदासजी, उपध्यक्षौ श्रीस्वामिभक्तवत्सलदासजी तथा च श्रीस्वामिभक्तिनंदनदासजी चरणाः समुपस्थिताः आसन्। तथा च "स्वामिनारायण विश्वविद्यालयस्य" कुलपतिः वैद्यश्रीधरः राव, कुलसचिव डो. श्रीअजित गंगावणे महोदयानां अपि विशेषासमुपस्थितिः आसीत् । सर्वमहाविद्यालयस्य प्रधानाचार्याणां, शिक्षकाणां छात्राणाञ्च सपुपस्थितिः आसीत् । संस्कृतसहितासिद्धान्तविभागस्य संयोजकेन अयं कार्यक्रमः अभवत्। विविधस्पर्धासु प्राप्तविजयछात्रान् प्रमाणपत्रेण उपहारेण च संमानं च कृत्वा विश्वस्य "शं" भवतु इति प्रार्थनां च कृत्वा कर्याक्रमस्य समाप्तिं कारितम् |